# Shri Venkatesha Mangalashtakam

# શ્રીવેઙ્કટેશ મઙ્ગલાષ્ટકમ્

## Document Information

Text title : veNkaTesha maNglAShTakam

File name : venkaTeshamangalAShTakam.itx

Category : aShTaka, vishhnu, venkateshwara, vishnu, mangala

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Latest update : August 22, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ મઙ્ગલાષ્ટકમ્

શ્રીક્ષોણ્યૌ રમણીયુગં સુરમણીપુત્રોઽપિ વાણીપતિઃ
પૌત્રશ્ચન્દ્રશિરોમણિઃ ફણિપતિઃ શય્યા સુરાઃ સેવકાઃ ।
તાર્ક્ષ્યો યસ્ય રથો મહશ્ચ ભવનં બ્રહ્માણ્ડમાદ્યઃ પુમાન્
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૧॥

યત્તેજો રવિકોટિકોટિકિરણાન્ ધિક્કૃત્ય જેજીયતે
યસ્ય શ્રીવદનામ્બુજસ્ય સુષમા રાકેન્દુકોટીરપિ ।
સૌન્દર્યં ચ મનોભવાનપિ બહૂન્ કાન્તિશ્ચ કાદમ્બિનીં
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૨॥

નાનારત્ન કિરીટકુણ્ડલમુખૈર્ભૂષાગણૈર્ભૂષિતઃ
શ્રીમત્કૌસ્તુભરત્ન ભવ્યહૃદયઃ શ્રીવત્સસલ્લાઞ્છનઃ ।
વિદ્યુદ્વર્ણસુવર્ણવસ્ત્રરુચિરો યઃ શઙ્ખચક્રાદિભિઃ
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૩॥

યત્ફાલે મૃગનાભિચારુતિલકો નેત્રેઽબ્જપત્રાયતે
કસ્તૂરીઘનસારકેસરમિલચ્છ્રીગન્ધસારો દ્રવૈઃ ।
ગન્ધૈર્લિપ્તતનુઃ સુગન્ધસુમનોમાલાધરો યઃ પ્રભુઃ
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૪॥

એતદ્દિવ્યપદં મમાસ્તિ ભુવિ તત્સમ્પશ્યતેત્યાદરા-
દ્ભક્તેભ્યઃ સ્વકરેણ દર્શયતિ યદ્દૃષ્ટ્યાઽતિસૌખ્યં ગતઃ ।
એતદ્ભક્તિમતો મહાનપિ ભવામ્ભોધિર્નદીતિ સ્પૃશન્
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૫॥

યઃ સ્વામી સરસસ્તટે વિહરતો શ્રીસ્વામિનામ્નઃ સદા
સૌવર્ણાલયમન્દિરો વિધિમુખૈર્બર્હિર્મુખૈઃ સેવિતઃ ।
યઃ શત્રૂન્ હનયન્ નિજાનવતિ ચ શ્રીભૂવરાહાત્મકઃ
શ્રીમદ્વેઙ્કટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૬॥

યો બ્રહ્માદિસુરાન્ મુનીંશ્ચ મનુજાન્ બ્રહ્મોત્સવાયાગતાન્
દૃષ્ટ્વા હૃષ્ટમના બભૂવ બહુશસ્તૈરર્ચિતઃ સંસ્તુતઃ ।
તેભ્યો યઃ પ્રદદાદ્વરાન્ બહુવિધાન્ લક્ષ્મીનિવાસો વિભુઃ
શ્રીમદ્વેઙ્કુટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૭॥

યો દેવો ભુવિ વર્તતે કલિયુગે વૈકુણ્ઠલોકસ્થિતો
ભક્તાનાં પરિપાલનાય સતતં કારુણ્યવારાં નિધિઃ ।
શ્રીશેષાખ્યમહીધ્રમસ્તકમણિર્ભક્તૈકચિન્તામણિ
શ્રીમદ્વેઙ્કુટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૮॥

શેષાદ્રિપ્રભુમઙ્ગલાષ્ટકમિદં તુષ્ટેન યસ્યેશિતુઃ
પ્રીત્યર્થં રચિતં રમેશચરણદ્વન્દ્વૈકનિષ્ટાવતા ।
વૈવાહ્યાદિશુભક્રિયાસુ પઠિતં યૈઃ સાધુ તેષામપિ
શ્રીમદ્વેઙ્કુટભૂધરેન્દ્રરમણઃ કુર્યાદ્ધરિર્મઙ્ગલમ્ ॥ ૯॥

॥ ઇતિ શ્રી વેઙ્કુટેશ મઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by YV Malleswara Rao malleswararaoy@yahoo.com

*Shri Venkatesha Mangalashtakam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*